# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा मई - २०२१

कक्षा – आचार्य-१ (SEM-2) **प्रश्नपत्रम् – ३** गुणाः - ५०

विषयः – सर्वदर्शनम् **कोड - CC-4.2.5** समयः – 02 TO 04

दिनाङ्कः – 15/07/2021 सन्दर्भग्रन्थः – न्यायसिद्धान्तमुक्तावली (शक्तिनिरूपणानन्तरम् आन्तम्)

---

सूचना – (i) निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्च प्रश्ना विधेयाः।

(ii) प्रत्येकं प्रश्नस्य अङ्काः समानाः सन्ति। (१०)

प्रश्नः – १ अधोलिखितेषु प्रश्नेषु द्वयोः प्रश्नयोः व्याख्यात्मकम् उत्तरं लिख्यताम् ।

(१) “अथ द्रव्याश्रिता ज्ञेया निर्गुणा निष्क्रिया गुणाः” इति कारिकां व्याख्यात।

(२) वैशेषिकगुणान् प्रतिपादयत।

(३) रसनिरूपणं यथाग्रन्थम् उपपादयत।

प्रश्नः – २ संख्यालक्षणं विलिख्य तस्याः यथाग्रन्थं विवेचनं कुरुत।

प्रश्नः – ३ अर्थापत्त्यादीनां प्रमाणानाम् अतिरिक्तप्रमाणतां निराकुरुत।

प्रश्नः – ४ गुणत्वजातिं संसाध्य मूर्तामूर्तगुणत्वं विमृशत।

प्रश्नः – ५ क्षणप्रक्रियाविषये एकं निबन्धं लिखत।

प्रश्नः – ६ अधोलिखितेषु प्रश्नेषु द्वयोः प्रश्नयोः व्याख्यात्मकम् उत्तरं लिख्यताम् ।

(१) संयोगः।

(२) प्रमायाः लक्षणम्।

(३) निर्विकल्पकज्ञानम्।

प्रश्नः – ७ मीमांसामतानुसारं सर्वेषां ज्ञानानां यथार्थत्वम् उपपादयत।

प्रश्नः – ८ व्याप्तिग्रहोपायान् वर्णयतु।

प्रश्नः – ९ अनुमानस्य त्रैविध्यम् उपपादयत।

प्रश्नः – १० वेदस्य पौरुषेयत्वसिद्धिं यथाग्रन्थं प्रतिपादयत।

प्रश्नः – ११ अधोनिर्दिष्टेषु केषाञ्चित् दश प्रश्नानाम् अतिलघूत्तरं यच्छत ।

(१) रूपं केन गृह्यते?

(२) मधुरादिभेदेन अनेकधा कः गुणः उपलभ्यते?

(३) स्पर्शः कतिविधः अस्ति?

(४) अपेक्षाबुद्धिजाः द्वित्वादयः कुत्रपर्यन्ताः मताः?

(५) न्यायदर्शने अर्थापत्तिप्रमाणं स्वीक्रियते उत न?

(६) परिमाणं कतिविधम्?

(७) को नाम उपाधिः

(८) सुखादीनां साक्षात्कारे करणं किम् अस्ति?

(९) रूपं रसः स्पर्शगन्धौ इत्यादिगुणाः मूर्तगुणाः उत अमूर्तगुणाः?

(१०) गुणाः कति सन्ति?

(११) अभावः कतिविधः परिकीर्तितः?

(१२) प्रमात्वं स्वतोग्राह्यम् इति के वदन्ति?

(१३) अन्यथाख्यातिवादिनः के सन्ति?

(१४) न्यायदर्शने कति प्रमाणानि स्वीक्रियन्ते?

(१५) न्यायसिद्धान्तमुक्तावली केन रचिता?

***

# Answer Key

कक्षा – आचार्य-१ (SEM-2) **प्रश्नपत्रम् – ३** गुणाः - ५०

विषयः – सर्वदर्शनम् **कोड - CC-4.2.5** समयः -

दिनाङ्कः - सन्दर्भग्रन्थः – न्यायसिद्धान्तमुक्तावली (शक्तिनिरूपणानन्तरम् आन्तम्)

**प्रश्नः – ११** (१) रूपं केन गृह्यते?
चक्षुरिन्द्रियेण

(२) मधुरादिभेदेन अनेकधा कः गुणः उपलभ्यते?
रसः।

(३) स्पर्शः कतिविधः अस्ति?
त्रिविधः।

(४) अपेक्षाबुद्धिजाः द्वित्वादयः कुत्रपर्यन्ताः मताः?
परार्धपर्यन्ता मताः।

(५) न्यायदर्शने अर्थापत्तिप्रमाणं स्वीक्रियते उत न?
न स्वीक्रियते।

(६) परिमाणं कतिविधम्?
चतुर्विधम्

(७) को नाम उपाधिः
साध्यव्यापकत्वे सति साधनाव्यापकत्वम्।

(८) सुखादीनां साक्षात्कारे करणं किम् अस्ति?
मनः

(९) रूपं रसः स्पर्शगन्धौ इत्यादिगुणाः मूर्तगुणाः उत अमूर्तगुणाः?
मूर्तगुणाः।

(१०) गुणाः कति सन्ति?
चतुर्विंशतिविधाः।

(११) अभावः कतिविधः परिकीर्तितः?
चतुर्विधः।

(१२) प्रमात्वं स्वतोग्राह्यम् इति के वदन्ति?
मीमांसकाः।

(१३) अन्यथाख्यातिवादिनः के सन्ति?
नैयायिकाः।

(१४) न्यायदर्शने कति प्रमाणानि स्वीक्रियन्ते?
चत्वारि।

(१५) न्यायसिद्धान्तमुक्तावली केन रचिता?
विश्वनाथपञ्चाननभट्टाचार्येण